# S-221090–C / S-221512–C

## विषय : संस्कृत

समय : 3 घण्टे ] [ पूर्णांक : 7

**निर्देश** : (*i*) सर्वे प्रश्नाः समाधेयाः।
(*ii*) सुन्दरं सुस्पष्टञ्च उत्तरं लिखत।

**प्रश्न–1** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4

(क) पुत्रं द्रष्टुं कः प्रस्थितः ?

(ख) मङ्गलयानस्य मार्गः कतिधा परिवर्तितः ?

(ग) कस्मात् पादम् आदत्ते ?

(घ) केषां शोधकाः वृक्षाः ?

(ङ) अस्माकं कर्तव्यं किम् ?

**प्रश्न–2** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत— [1×4=4]

(क) मत्स्यपालनक्षेत्रे कः पुरस्कारः दीयते ?

(ख) लाभानामुत्तमं किम् ?

(ग) वृक्षाः प्राणिनां कथम् उपकुर्वन्ति ?

(घ) कः न्यायाधीशः आसीत् ?

(ङ) दीपमालिकापर्वणि कस्य शब्दः श्रूयते ?

**प्रश्न-3** स्वपाठ्यपुस्तकात् चतस्रः सूक्तीः लिखत याः अस्मिन् प्रश्नपत्रे नागताः स्युः। [1×4=4]

**प्रश्न-4** स्व पाठ्यपुस्तकात् कौचित् द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे नागतौ स्याताम्। [2½×2=5]

**प्रश्न-5** अधोलिखित श्लोकस्य हिन्दीभाषया अर्थं लिखत— [3]

अनन्तपारं किल शब्दशास्त्रं
स्वल्पं तथायुर्बहवश्च विघ्नाः।
सारन्ततो ग्राह्यमपास्य फल्गु
हंसैर्यथा क्षीरमिवाऽम्बुमध्यात्॥

**प्रश्न-6** अधोलिखितं श्लोकं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

धन्यानामुत्तमं दाक्ष्यं धनानामुत्तमं श्रुतम्।
लाभानामुत्तमं श्रेयः सुखानां तुष्टिरुत्तमा॥

*प्रश्नाः*

(*i*) 'सुखानां तुष्टिरुत्तमा' इति वाक्यस्य हिन्दीभाषया अनुवादं कुरुत।

(*ii*) 'धनानाम्' इति पदे विभक्तिः अस्ति।

(*iii*) 'हानिः' इति पदस्य श्लोके विलोमपदं प्रयुक्तम्।

**प्रश्न-7** अधोलिखित गद्यांशस्य हिन्दीभाषया अनुवादं कुरुत— [3]

''खलु अस्माकं मङ्गलयानकार्यक्रमः समग्रान्तरिक्षान्वेषणस्य शोधकार्यक्रमस्य आदर्शभूतः। अस्य साफल्येन अन्तरिक्षे भारतस्य प्रभावः उत्कर्षतां प्राप्नोत्। अनेन अन्तरिक्षव्यवसायस्य अवसरः आयास्यति युवानश्चापि सक्रियाः भविष्यन्ति।''

**प्रश्न-8** अधोलिखित गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [1×3=3]

''कश्चन् निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। सः स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दातुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनुजस्य रुग्णतामाकर्ण्य व्याकुलो जातः।''

*प्रश्ना:*

(*i*) पिता कस्य रुग्णतामाकर्ण्य व्याकुलोजाता ? (एकपदेन उत्तरत)

(*ii*) जन: कथं वित्तमुपार्जितवान् ? (पूर्णवाक्येन उत्तरत)

(*iii*) गद्ये 'धनहीन:' इति पदस्य पर्यायपदं प्रयुक्तम् ?

**प्रश्न–9** (*अ*) भवत्या: नाम मनोरमा अस्ति। भवती स्वमातुलस्य परिणयोत्सवे ग्रामं गन्तुमिच्छति। अत: अवकाशाय प्राचार्यं प्रति संस्कृतभाषया प्रार्थनापत्रं लिखतु। [1+2+1=4]

*अथवा*

भवान् बस्तरनगरे स्थित: मयङ्क:। भवत: मित्रं नरेश: मनहरे बालोद नगरे वसति। तं परीक्षायां सफलतायै वर्धापनं-पत्रं कोष्ठक प्रदत्त पदानां सहायतया लिखत—

(प्रसन्नता, प्राप्स्यसि, नमस्ते, वर्धापनं, अत्रकुशलं, बालोदत:, सफलतां, अपश्यम्)

स्थानम् (*i*) --------

दिनाङ्क: 07-11-2021

प्रिय मित्र नरेश: मनहरे

सप्रेम (*ii*) --------

(*iii*) -------- तत्रास्तु। अद्यैव तव परिणाम: आगत:। तव (*iv*) -------- ज्ञात्वा मम मनसि महती (*v*) -------- जाता यदा अहं तव नाम योग्यता सूचौ (*vi*) --------। त्वया सप्तशतम् अङ्का: प्राप्ता:। त्वं निश्चितरूपेण (*vii*) --------। त्वया परिवारस्य विद्यालयस्य च नाम उज्ज्वलीकृतम्।

अस्याम् उज्वल सफलतायाम् अहं तुभ्यं हार्दिकं (*viii*) -------- यच्छामि। उज्ज्वल भविष्याय च कामये। मातृपितृचरणेषु प्रणाम:।

तव अभिन्नहृदयं मित्रम्

मयङ्क:

(*ब*) अधोलिखितं अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत—

मातृभूमि: बहुविधै: द्रव्यै: अस्मान् उपकरोति। तस्यै अस्माकमपि कर्तव्यं यत् वयं कायेन, मनसा, वाचा, धनेन च स्वमातृभूमे: उन्नतिं कुर्याम। देशाय अस्माकं देशवासिनां हृदयेषु प्रेम भवेत्। मातृभूमिं प्रति सम्मानं भवेत् अतएव कथितम्—"जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।"

*प्रश्नाः* [1×2=2]

(क) एकपदेन उत्तरत—

(*i*) का अस्मान् उपकरोति ?

(*ii*) मातृभूमिं प्रति किं भवेत् ?

(ख) पूर्णवाक्येन उत्तरत— [2]

(*i*) मातृभूम्यै अस्माकं किं कर्तव्यम् अस्ति ?

***अथवा***

गद्यांशस्य सारांशं संस्कृतभाषया लिखत।

**प्रश्न-10** द्वादशवाक्येषु संस्कृतभाषया निबन्धलेखनं कुरुत (कोऽपि **एकः**)— [½×12=6]

(*i*) महाकविः कालिदासः

(*ii*) सुभाषचन्द्रः

(*iii*) सदाचारः

(*iv*) पर्यावरणम्

**प्रश्न-11** समासविग्रहं कृत्वा नामानि लिखत— [1×3=3]

(*क*) हरिहरौ

(*ख*) नीलाम्बरः

(*ग*) चतुर्युगम्

**प्रश्न-12** निर्देशानुसारं लकार परिवर्तनं कृत्वा लिखत— [1×3=3]

(*क*) बालिकाः क्रुध्यन्ति (लङ्लकारे)

(*ख*) वृद्धः अकथयत् (लट्लकारे)

(*ग*) छात्रौ नृत्येताम् (लोट्लकारे)

**प्रश्न-13** वाच्यमवबुध्य नाम लिखत— [1×3=3]

(क) अश्वैः धाव्यते।

(ख) मया पत्रं लिख्यते।

(ग) विद्या विनयं ददाति।

**प्रश्न-14** रेखाङ्कित शब्दयोः प्रकृति-प्रत्ययं पृथक् कुरुत— [1×2=2]

(क) मनुष्यः <u>सामाजिकः</u> प्राणी अस्ति।

(ख) <u>क्रूरता</u> तु सदैव निन्दनीया एव भवति।

**प्रश्न-15** निम्नरेखाङ्कित पदयोः सन्धिं कृत्वा नाम्नी लिखत— [1×2=2]

(क) बालकः <u>पुस्तकम् पठति</u>।

(ख) <u>वाक् + ईशः</u> सर्वत्र पूजनीयः भवति।

**प्रश्न-16** अधः प्रदत्ते संख्ये संस्कृतभाषया लिखत— [1×2=2]

(क) 126

(ख) 139

**प्रश्न-17** अधोलिखित पदयो उपसर्गं चित्वा लिखत— [1×2=2]

(क) प्रतिवदति

(ख) सुकरोति

**प्रश्न-18** (अ) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(i) राष्ट्रीयतापविद्युतकेन्द्रमस्ति—

(क) बालोदनगरं

(ख) कोरबानगरं

(ग) भिलाई नगरं

(घ) कोरियानगरं

(*ii*) अरपानद्यां जलप्लावनं भवति—

(क) ग्रीष्मकाले

(ख) शीतकाले

(ग) हेमन्तकाले

(घ) वर्षाकाले

(*iii*) 'तत्र बालः तुलेन्द्रः गान्धिनः भ्रमण सहायकासीत्' इति वाक्ये अव्यय पदमस्ति—

(क) बालः

(ख) गान्धिनः

(ग) तत्र

(घ) भ्रमण

(*iv*) 'कविना' इति पदे विभक्तिः अस्ति—

(क) तृतीया विभक्तिः

(ख) चतुर्थी विभक्तिः

(ग) द्वितीया विभक्तिः

(घ) पञ्चमी विभक्तिः

(*v*) 'किशोरी' इति पदे प्रत्ययः अस्ति—

(क) ताप्

(ख) तल् + ताप्

(ग) तल्

(घ) ङीप्

(ब) उचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत— [1×5=5]

(आस्ताम्, युष्मद्, निर्णेतुं, अनुस्वार सन्धि, उपसर्ग)

(i) प्रमाणाभावात् स —— नाशक्नोत्।

(ii) तौ धर्मपरायणौ —— ।

(iii) 'अनुमन्यते' इति पदे 'अनु' —— अस्ति।

(iv) 'त्वया' इत्यस्मिन् पदस्य मूलशब्दः —— अस्ति।

(v) शरीरेषु नूतनं रक्तं संचरति रेखाङ्कितपदे —— सन्धि अस्ति।

(स) सुमेलनं कुरुत— [1×5=5]

| | (क) | | (ख) |
|---|---|---|---|
| (i) | युवाम् ह्यः हट्टं | - | अधिकरण कारक |
| (ii) | 'स्वस्ति, स्वाहा, स्वधा' योगे | - | बहुतरी तृणात् |
| (iii) | चिन्ता | - | क्रेतुम् |
| (iv) | 'में', 'पर' | - | चतुर्थी विभक्तिः |
| (v) | आपणं यास्यति | - | अगच्छतम् |

———

**https://www.cgboardonline.com**
**Whatsapp @ 9300930012**
**Send your old paper & get 10/-**
**अपने पुराने पेपर्स भेजे और 10 रुपये पायें,**
**Paytm or Google Pay से**